# .. Narayanasukta ..

# ॥ नारायणसूक्तम् ॥

Document Information

Text title : naaraayaNasuuktaM

File name : narayanasukta.itx

Category : sUkta

Location : doc_veda

Author : Vedic Tradition

Language : Sanskrit

Subject : philosophy/hinduism

Transliterated by : Rajagopal Iyer (rajsand at yahoo.com)

Proofread by : Rajagopal Iyer (rajsand at yahoo.com)

Latest update : June 14, 2000

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 12, 2016

*sanskritdocuments.org*

# ॥ नारायणसूक्तम् ॥

तैत्तिरीयारण्यकम् - ४ प्रपाठकः - १० अनुवाकः १३

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ॥ सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवं।
विश्वं नारायणं देवमक्षरं परमं पदम्।
विश्वतः परमान्नित्यं विश्वं नारायणꣳ हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति।
पतिं विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्।
नारायणपरो ज्योतिरात्मा नारायणः परः।
नारायण परं ब्रह्म तत्वं नारायणः परः।
नारायणपरो ध्याता ध्यानम् नारायणः परः।
यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः।
अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशम्भुवम्।
पद्मकोश प्रतीकाशꣳ हृदयं चाप्यधोमुखम्।
अधो निष्टया वितस्यान्ते नाभ्यामुपरि तिष्ठति।
ज्वालमालाकुलं भाति विश्वस्यायतनं महत्।
सन्ततꣳ शिलाभिस्तुलम्बत्याकोशसन्निभम्।
तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम्।
तस्य मध्ये महनग्निर्विश्वार्चिर्विश्वतोमुखः।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः।
तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता।
सन्तापयति स्वं देहमापादतलमस्तकः।
तस्य मद्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः।
नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा।

नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा।
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः।
स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्॥

ऋतँ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः।
ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।

Encoded with Accents by Rajagopal Iyer rajsand@yahoo.com

.. Narayanasukta ..

was typeset on August 12, 2016

Please send corrections to *sanskrit@cheerful.com*